CC-0. In Public Domain. Digitization by eGangotri.Funding: MoE-IKS

॥ श्रीः ॥

शास्त्र
नाम्
2
श्रा

मुक्तचयनम्

४०४

सम्पादकः

पं. छविलाल पोखरेलः

प्रधानाचार्यः

श्रीपिण्डेश्वर संस्कृत महाविद्यालयः

धरानः (नेपाल)

वैक्रमाब्दः २०१६

2:4y8
POK
019B.S.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

CC-0. In Public Domain. Digitization by eGangotri Funding: MoE-IKS

॥ श्रीः ॥

मुक्ताचयनम्

सम्पादकः
पं. छविलाल पोखरेल

धर्मशास्त्र १४४

प्रधानाचार्यः
श्रीपिण्डेश्वर संस्कृत महाविद्यालयः
धरानः

प्रकाशकः
संस्कृतच्छात्र-पुस्तकालयः
(श्रीपिण्डेश्वर संस्कृत महाविद्यालयो धरानः)

मुद्रकः
श्री शिव प्रिन्टिङ्ग प्रेसः धरानः
मूल्यम् ने. रू.— पञ्चाशत्पणाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राक्कथनम्

यद्यपि एकस्य जनस्य सर्वेषु विषयेषु पूर्णतया विद्वत्ता भवितुं न शक्नोति। एक एव नरो डाक्टरोऽपि भवतु, इञ्जिनियरोऽपि भवतु इति न समीचीनम्। विभिन्नानि कार्याणि अपि सम्यक्कर्तुं न शक्नुयात्, एकतराभ्यासस्य वैयर्थ्यमिव च दृश्यते! तथापि केषांचित्तु विषयाणां विभिन्नानामपि ज्ञानं प्रतिमनुष्यमत्यावश्यकं दृश्यते।

ते च विषयाः स्वास्थ्यरक्षा-शौच-नियम-धार्मिक-नैतिक-शास्त्रादयः। एतेषु विषयेषु संस्कृतभाषायां संक्षेपेण लिखितं पुस्तकं प्रायो न दृश्यते! ते विषया मनुस्मृतौ, महाभारते, वेदे, आयुर्वेदे, नीतिशास्त्रादौ च विद्यन्ते। समुद्रेभ्यो मुक्ता इव तेभ्यः सारं संगृह्य प्रकाशनमावश्यकं स्मृतम्।

यद्यपि, संस्कृतशास्त्रस्थानां मुक्तानां चयनं कर्तुं सर्वांशेन न शक्यते तथापि यत् किञ्चिदेव चयनं यदि लोकोपकारि भवेत्, स्वपरिश्रमं सफलं मन्ये!

99637

Digitized by Arya Samaj Foundation Chennai and eGangotri, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

वैदिकमन्त्राणां पृथगेव चयनेन समीचीनता स्यादिति विचार्य वल्पा एव मन्त्रा अत्र समावेशिताः ।

इदानीं तमाखु-विडी-सिग्रेट गञ्जा-भङ्गादिरूपेण धूम्रपानस्य बहुधा प्रचारो दृश्यते, इति तद्विषयेऽपि पद्यं लिखितम् ।

केचन धार्मिकं विषयं साम्प्रदायिकं मत्वा उपेक्षाबुद्धिं द्वेषबुद्धिं च कुर्वन्ति, तत्स्था थिनां साम्प्रदायिकानाम्, अथवा वास्तविकधर्म-ज्ञानाभावेन धर्माभासेन निस्सद्विचाराणां धार्मिकं मन्यानां परस्परं युद्धेन, अस्माकं धर्मस्य यथार्थरूपां व्याख्यामविज्ञाय च तेषां तादृशी बुद्धि र्जाता । अत एव च धार्मिकविषयस्य यथार्थतो व्याख्या-प्रचारादिकमत्यावश्यकम् ।

ईश्वरभजनं प्राणिनामुपकार उन्नतिश्च अस्माकं धर्मशब्द-स्यार्थः । स तु इसाई-मुसल्मानादीनामापि दृष्टौ, आदरणीयो मननीयश्चावलोक्यते । मध्यकाले तैः सह घात-प्रतिघाताः क्रियां-प्रतिक्रिया श्च जाताः ।

एवमेव रीति-स्थिति-नियमोपनियमानां वृथा स धर्मो हिन्दूनां-कृते, एव, इव भाति ।

प्राणिना मुपकारोन्नतिरूपे एव धर्मे न विभिन्न धर्मि भिः सह विरोधः । ईश्वरभजनरूपे एव धर्मे विरोधो ना । यदि अस्माकं धर्मस्य सारो विचार्यते तर्हि तत्रापि विरोधो न वलोक्यते । यथा "जन्माद्यस्य यतः" ब्रह्मसूत्रे भागवते च "यतः प्रवृति र्भूतानां येन सर्वमिदं ततम्" गीतायां च, अर्थात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यस्मात् संसारस्य सृष्टि-स्थिति प्रलया भवन्ति यश्च सर्वत्र व्याप्तो विद्यते स परमेश्वरो भजनीयः।

अत्र विरोधलेशोऽपि ईश्वरवादिनां नोपलभ्यते। अत एव अस्माकं धर्मं सनातनधर्मं वदन्ति। केचन आर्य धर्मं हिन्दू धर्मं वा वदन्ति अलमत्र, अन्यत्र विस्तरः।

अथावशिष्टम्, अस्माकमेव समाजे स्थितानां शूद्राणामस्पृश्यानां च धार्मिकविषये अधिकारसंबन्धिनी वार्ता, तत्रापि "श्वादोऽपि सद्यः सवनाय कल्पते" "किरातहूणान्ध्रपुलिन्दपुल्कसा आभीरकङ्का यवनो खसादयः भागवते चाण्डालोऽपि भगवद् भक्त्या शुद्धो भूत्वा धर्म-कर्मणि अधिकारी भवति। शूद्रे चैतद् भवेल्लक्ष्म विप्रे तच्च नविद्यते। न वै शूद्रो भवेच्छूद्रो ब्राह्मणो न च ब्राह्मणः। धर्मो यज्ञक्रिया तेषां न नित्यं प्रतिपिध्यते" (महाभारते शान्तिपर्वणि) इत्यादिनापि भगवद्भजने धर्मे यज्ञक्रियायामपि न कस्याश्चन जातेः सर्वदाधिकाराभावः।

अस्माकं राष्ट्रपित्रा स्वर्गीयविभुवनेन राज्ञा तथा राष्ट्रनायकेन च महेन्द्रभूभुजा जनतायाः सहयोगेन प्रजातन्त्रस्थानानन्तर मतदान मतग्रहणयोरधिकारप्रदानेन सर्वेषां नागरिकाणां जातिलिङ्गा-विशेषेण शासनेऽधिकारः स्वीकृतः। एवं चास्माभिरपि विद्वद्भि धर्ममर्यादायां तिष्ठद्भिर्धार्मिकशास्त्रैर्दत्तस्याधिकारस्य धार्मिक विषयेऽपि, उपभोगं सर्वाजातयः कुर्वन्तु इति स्मर्तव्यम्, अत एव एत न्मुक्ताचयनं सर्वेषा मेव कृते अस्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri and Funding: MIDF

जान्नुपर्ने विषय असंख्य छन्। एकै जनाको सबै विषयमा गम्भीर जानकारी हुन मुस्किल छ। ता पनि कैयौं विषय यस्ता पनि छन् जो प्रत्येक मनुष्यले केहि न केहि जान्नु अत्यन्त आवश्यक छ, ती विषय हुन् भूगोल, इतिहास, गणित, स्वास्थ्यशिक्षा, नैतिकशिक्षा धार्मिकशिक्षा आदि। त्यस्ता विषयहरू संक्षेपले लेखिएका ६/७ कक्षादेखि शास्त्री र बी. ए., एम्. ए. सम्मका छात्रहरूलाई काम दिने साना खालका संस्कृत भाषाका पुस्तकहरू आवश्यक देखिये। जसमा ती विषयहरू छोटकरीमा बताइयेका हुउन्। त्यस्तो पुस्तक अचेललाई सुहाउने पाउन मुस्किल थियो। स्वास्थ्यविषय आयुर्वेदमा थिये, धार्मिक-नैतिक विषय वेद, धर्मशास्त्र, नीतिशास्त्रमा थिये। त्यसो हुदा ती ती शास्त्रबाट छाँट काँट गर्दै सानु पुस्तक संग्रह गरियेकोछ। धूमपान अचेल खुब चलेको छ। कुनै स्वास्थ्यलाई कम हानि गरेपनि समय र द्रव्यको व्यर्थमा व्यय गराउने छन्, कुनै स्वास्थ्यलाई समेत हानि गर्ने पनि छन्। सो धूमपान तमाखु, विडि, सिगरेट, गाँजा, भाङ आदि द्वारा गरिन्छ। ती चीजका बारेमा पनि आफ्ना तर्फबाट लेखियेको छ। पुराना ग्रन्थको संग्रह हुदा र अभ्यास गर्न सजिलो हुदा पद्यरूपमा लेखियेको हो।

कसै कसैले धार्मिक विषयलाई साम्प्रदायिक विषय ठहराई उपेक्षाबुद्धि वा द्वेषबुद्धि समेत लिने गरेको देखिन्छ, तर त्यो स्वार्थी साम्प्रदायिकहरूका परस्पर काटाकाट मारामार लडाई झगडा देखेर सुनेर र हाम्रा धर्मको ठीक व्याख्यान बुझेर समेत हो। ईश्वरको

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भजन गर्नु र प्राणीहरूको उपकार उन्नति गर्नु धर्म हो। बौद्धधर्मी र हिन्दुधर्मीहरूको नेपालमा कुनै खास भेद छैन। वास्तवमा हाम्रो मुख्यधर्म जसलाई आर्यधर्म, हिन्दुधर्म, सनातन- धर्मआदि नामले व्यवहार गरियेको छ, सो धर्म ईसाइ, मुसलमानहरूको दृष्टिमा पनि उत्तिकै आदरणीय, मननीय, ग्रहणीय छ।

बीचमा उनीहरूका साथमा घात प्रतिघात, क्रिया प्रतिक्रिया पर्दैजाँदा अनेक रीति स्थितिनियम उपनियम बढेकोले हिन्दूहरूका निति मात्र बताये को हो कि जस्तो भयेको छ। दुनियाँको उपकार उन्नति गर्नेवारेमा कुनै धर्मको विरोध छैन, ईश्वर मान्ने वारेमा मात्र विरोधदेखिन्छ तर हाम्रा शास्त्रमा ता त्यस वारेमा पनि विभिन्न धर्मका साथ विरोध देखिदैन, जस्तै "जन्माद्यस्य यत." ब्रह्मसूत्र, भागवत, "यतः प्रवृत्तिर्भूतानाम्" गीता अर्थात "यस संसारको सृष्टि स्थिति प्रलय जसबाट हुन्छ, त्यहि ईश्वर वाब्रह्म अथवा परमात्मा आदि नामले पुकारिन्छ, त्यसैको भजन गर" सबै धर्ममा ईश्वरको लक्षण यही हुन सक्छ।

अब रह्यो, हाम्रा हिन्दू मध्येका शूद्र छूत अछूत को धर्मसंबन्धी वेद संबन्धी अधिकारको विषय त्यसमापनि "श्वादोऽपि सद्यः सवनाय कल्पते" "किरात हूणान्ध्र, "शूद्र चैतद्भूवेल्लक्ष्म" "धर्मोयज्ञ क्रिया तेषां न नित्यं प्रतिषिध्यते" अर्थात् जुन भगवानको भजनले चण्डाल पनि धर्मकार्यमा अधि-

Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कारी हुन्छ किरात हूण आदि पनि भगवानको भजनले शुद्ध हुन्छन् । शूद्रको क्षणल बाहुनमा र बाहुनको लक्षण शूद्रमा देखियो भने शूद्र शूद्र हुदैन बाहुन बाहुन हुदैन । धर्म र यज्ञ क्रिया सर्वे निषेध गरिदैनन् इत्यादि श्रीमद्भागवत, महाभारत, शिव पुराण आदिबाट धर्ममा अधिकार स्पष्ट देखिन्छ ई माथि बताइयेका श्लोकहरू यसै पुस्तकका उत्तरभागमा छन् ।

राष्ट्रपिता स्व० श्री ५ महाराजाधिराज र राष्ट्रनायक श्री ५ महाराजाधिराजबाट जनताको सहयोगले प्रजातन्त्र कायम गरिबक्सी राजनीतिक अधिकार सबैलाई बक्सियो । पहिले पनि राष्ट्रनिर्माता श्री ५ बडामहाराजाधिराज पृथ्वीनारायणशाहबाट पनि 'यो देश चार जात छत्तिस वर्णको फुलबारी हो" भन्नेघोषणा द्वारा सबैजातका देशवासीलाई देशको विकास गर्ने र उपयोग गर्ने अधिकार बक्सेको थियो ।

हामी प्रजाले पनि धार्मिक शास्त्रको मर्यादामा रहदै धार्मिक शास्त्रहरूले दियेको धार्मिक अधिकारको पनि उभयोग गर्न दिनु पछैं, बाधा गर्न ठीक छैन । त्यसो हुदा यो संग्रह सबैका निमित्त हो ।

—सम्पादकः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्विताः शब्दाः

अगाधसमुद्रान्मुक्तानाञ्चयनमिव महाभारतादिग्रन्थादत्याद्वयसंकं सारं संगृह्य लिखितमिदं "मुक्ताचयनम्" न केवलं सुकोमलमतीनां छात्राणाङ्कृते, अपि तु समस्त विकासप्रियाणां जनानां कृतेऽपि महल्लाभदायकमस्ति, निजोद्देश्यानुकूलामिमां पुस्तिकां जनसमक्षं प्रापयन् "संस्कृतच्छात्रपुस्तकालयः" महत्सन्तोषमनुभवति ।

—प्रकाशकः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुक्ताचयनम्

(पूर्वभागः)

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनम् ॥१

ब्राह्मे मुहूर्ते उत्तिष्ठेत् स्वस्थो रक्षार्थमायुषः ।
शरीरचिन्तां निर्वर्त्य कृतशौचविधिर्भवेत् ॥२

नक्तं दिनानि मे यान्ति कथं भूतस्च संप्रति ।
दुःखभाङ्न भवत्येवं नित्यं सन्निहितस्मृतिः ॥३

निम्बन्यग्रोधखदिरकरञ्जककुमादिकम् ।
कनिन्यग्रसमंस्थौल्ये प्रगुणं द्वादशाङ्गुलम् ॥४

दृष्ट्वा विधाय मृद्वग्रं सावधानतया ततः ।
घर्षन्धावेत्ततो दन्तान्दन्तमांसान्यवाधयन् ॥५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. Panini Kanya Maha Vidyalaya Collection. Digitization by eGangotri Funding: MIDF

दन्तशोधनद्रव्येण शोधयेद् वा यथासुखम् ।
ताम्बूलं क्षतपित्तास्त्ररूक्षोत्कुपितचक्षुषाम् ॥६

विषमूर्च्छामदार्तानामपथ्यं शोषिणामपि ।
अभ्यङ्गमाचरेन्नित्यं स जराश्रमवातहा ॥७

दृष्टिप्रसादपुष्ट्यायुः स्वप्नसु त्वक्त्व दार्ढ्यकृ् ।
शिरः श्रवणपादेषु तं विशेषेण शीलयेत् ॥८

वर्ज्योऽभ्यङ्गः कफग्रस्तकृतसंशुद्ध्यजीर्णिभिः ।
नसाखुविडिसिग्रेट-भेदेन धूमपानकम् ॥९

बहुधा पीयते पञ्चशताब्द्या आगतं त्विह् ।
शरीरधातुवृद्ध्यर्थं नोपयुक्तं च तत्पुनः ॥१०

धनस्वास्थ्यव्ययो यस्मात्तस्मात्तत्परिवर्जयेत् ।
अन्यच्चगञ्जाभङ्गादि बहुधा पीयते जनैः ॥११

पीतं शिवेनेति शिवबूटीत्यपि च भाष्यते ।
कदाचिदग्निमान्द्यादौ लाभस्तत्पानतो भवेत् ॥१२

प्रत्यहं किन्तु तत्पानात्सोऽपि लाभो न दृश्यते ।
मस्तिष्कस्यापि विकृतिः केषां चिदवलोक्यते ॥१३

शैवे पुराणे भङ्गादिपानं शिवकृतं न हि ।
नैव भागवतादौ च स्वस्थान्यादौ तु दृश्यते ॥१४

अतस्तत्किंवदन्त्येव स्मर्यतां न तु वास्तवम् ।
अतो दोषावहं तत्तु नो सेव्यं सर्वदा बुधैः ॥१५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MoE-IKS

मार्गविश्रमजलादिभ्यो दूरतो मलमुत्सृजेत् ।
लाघवं कर्मसामर्थ्यं दीप्तोऽग्निर्मेदसः क्षयः ॥१६

वभक्तघनगात्रत्वं व्यायामादुपजायते ।
वातपित्तामयी बालो वृद्धोऽजीर्णी च तं त्यजेत् ॥१७

दीपनं वृष्यमायुष्यं स्नानमूर्जाबलप्रदम् ।
कण्डूमलश्रमस्वेदतन्द्रातृड्दाहपाप्मजित् ॥१८

स्नानमर्दितनेत्रास्यकर्णरोगातिसारिषु ।
आध्मानपीनसाजीर्णभुक्तवत्सु च गर्हितम् ॥१९

यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥२०

आचम्य प्रयतो नित्यमुभे सन्ध्ये समाहितः ।
शुचौ देशे जपं जाप्यमुपासीत यथाविधि ॥२१

वेदोपकरणे चैव स्वाध्याये चैव नैत्यके ।
नानुरोधोऽस्त्यनध्याये होममन्त्रेषु चैव हि ॥२२

जीर्णे हितं मितं चाद्यान्नवेगानीरयेद्बलात् ।
न वेगितोन्यकार्यः स्यान्न जित्वा साध्यमामयम् ॥२३

मात्राशी सर्वकालं स्यान्मात्राह्यग्नेः प्रवर्तिका ।
मात्रा प्रमाणं निर्दिष्टं सुखं यावद्विजीर्यति ॥२४

अनात्मवन्तः पशुवद्भुञ्जते येऽप्रमाणतः ।
रोगानीकस्य ते मूलमजीर्णं प्राप्नुवन्ति हि ॥२५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. Panini Kanya Maha Vidyalaya Collection. Digitization by eGangotri.Funding: MIDF

भोजनं हीनमात्रं तु न बलोपचयौजसे ।
सर्वेषां वातरोगाणां हेतुतां च प्रपद्यते ॥२६

सुखार्थाः सर्वभूतानां मताः सर्वाः प्रवृत्तयः ।
सुखं च न विना धर्मात्तस्माद्धर्मपरो भवेत् ॥२७

भक्तघा कल्याणमित्राणि सेवेतेतरदूरगः ।
हिंसास्तेयान्यथाकामं पैशून्ये पऽपानृते ॥२८

संभिन्नालापव्यापादमभिध्यादृग्विपर्ययम् ।
पापं कर्मेति दशधा कामवाङ्मानसैस्त्यजेत् ॥२९

अवृत्तिव्याधिशोकार्ताननुवर्तेत शक्तितः ।
आत्मवत्सततं पश्येदपि कीटपिपीलिकम् ॥३०

विमुखान्नार्थिनः कुर्यान्नावमन्येत न क्षिपेत् ।
उपकारप्रधानः स्यात्स्वापकारपरेऽप्यरौ ॥३१

आततायी दण्डनीय स्तथा देशद्रुहोऽपि च ।
संपद्विपत्स्वेकमना हेतावीर्ष्येत्फले न तु ॥३२

काले हितं मितं ब्रूयादविसंवादि पेशलम् ।
पूर्वाभिभाषी सुमुखः शुशीलः करुणामृदुः ॥३३

यस्य वाङ्मनसी शुद्धे सम्यग्गुप्ते च सर्वदा ।
स वै सर्वमवाप्नोति वेदान्तोपगतं फलम् ॥३४

नारुन्तुदः स्यादार्तोऽपि न परद्रोहकर्मधीः ।
ययाऽस्योद्विजते वाचा नालोक्यां तामुदीरयेत् ॥३५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding

अहिंसयैव भूतानाम् कार्यं श्रेयोऽनुशासनम् ।
वाक्चैव मधुरा श्लक्ष्णा प्रयोज्या धर्ममिच्छता ॥३६

वाक्संयमो हि नृपते सुदुष्करतमो मतः ।
अर्थवच्च विचित्रं च न शक्यं बहु भाषितुम् ॥३७

अभ्यावहति कल्याणं विविधं वाक्सुभाषिता ।
सैव दुर्भाषिता राजन्ननर्थायोपपद्यते ॥३८

रोहते सायकैर्विद्धं वनं परशुना हतम् ।
वाचा दुरुक्तं बीभत्सं न संरोहति वाक्क्षतम् ॥३९

वाक्सायका वदनान्निष्पतन्ति, यैराहतः शोचति ।
रात्र्यहानि परस्य ना मर्मसु ते पतन्ति तान्पण्डितो नावसृजेत्परेभ्यः ॥४०

मर्माण्यस्थीनि हृदयं तथासून् रूक्षा वाचो निर्दहन्तीह पुंसाम् ।
तस्माद्वाचमुषतीं रूक्षरूपां धर्मारामो नित्यशो वर्जयेत ॥४१

कृत्वा पापं हि सन्नह्य तस्मात्पापात्प्रमुच्यते ।
नैवं कुर्यां पुनरिति निवृत्या प्रयते तु सः ॥४२

अज्ञानाद्यदि वा ज्ञानात्कृत्वा कर्म विगर्हितम् ।
तस्माद्विमुक्तिमन्विच्छन् द्वितीयं न समाचरेत् ॥४३

नैकः सुखी न विश्रब्धः सर्वत्र न च शङ्कितः ।
प्रकाशये नापमानं न च निःस्नेहतां प्रभोः ॥४४

त्रिवर्गाशूयं नारम्भं कुर्यात्तं चाविरोधयन् ।
नीचरोमनखश्मश्रुर्निर्मलाङ्घ्रिरमलयनः ॥४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

स्नानशीलः सुसुरभिः सुवेषोऽनुल्वणोज्वलः ।
चैत्यपूज्य ध्वजाशस्त्रच्छायाभस्मतुषाशुचीन् ॥४६

नाक्रमेच्छर्करालोष्टवलिस्नानभुवोऽपि च ।
नासंवृतमुखः कुर्यात्क्षुतिहास्यविजृम्भणम् ॥४७

नासिकां न विकुष्णीया न्नाकस्माद्विलिखेद्भुवम् ।
नाङ्गैश्चेष्टेत विगुणं नासीनोत्कटकस्थितः ॥४८

नोर्ध्वजानुश्चिरं तिष्ठेन्नक्तं सेवेत न द्रुमम् ।
नेक्षेत प्रततं सूक्ष्मदीप्तानेष्याप्रियाणि च ।४९

मद्यविक्रयसन्धानदानादानानि नाचरेत् ।
सन्ध्यासु भोजनं स्वप्नं पठनं च विवर्जयेत् ॥५०

शस्त्रसूत्रगणाकीर्णगणिकापणिकाशनम् ।
गात्रवक्त्रनखैर्वाद्यं हस्तकेशावधूननम् ॥५१

तोयाग्निपूज्यमध्येन यानं धूमं शवाश्रयम् ।
आचार्यः सर्वचेष्टासु लोक एव हि धीमतः ॥५२

अनुकुर्यात्तमेवातो लौकिकेऽर्थे परीक्षकः ।
ग्रीष्मवर्ज्येषु कालेषु दिवा स्वापा त्प्रकुप्यतुः ॥५३

श्लेष्मपित्ते दिवास्वप्नस्तस्मात्तेषु न शस्यते ।
तृष्णातिसारशूलार्ता उन्मत्ताश्च विशेषतः ॥५४

जागरक्रोधशोकार्ता वृद्धबालाश्च हिक्किनः ।
अतिव्यायामिनश्चैते दिवा स्वप्युर्यथेप्सितम् ॥५५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MHRD

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥५६

आहारशयनब्रह्मचर्यैर्युक्तया निषेवितैः ।
शरीरं धार्यते नित्यमागारमिवधारणैः ॥५७

स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम् ।
सङ्कल्पोऽध्यवसायश्च रागतः करणं तथा ॥५८

क्रियानिष्पत्तिश्च सह ह्यष्टाङ्गं मैथुनं स्मृतम् ।
एतदष्टाङ्गत्यागेन ब्रह्मचर्यं हिसाध्यते ॥५९

पूर्वं तु पञ्चविंशत्या अथवा विंशतेस्तथा ।
ब्रह्मचर्यं धारणीयं वृद्धचर्थं बलबोधयोः ॥६०

स्त्रीणां पूर्णं षोढशाब्दा द्विंशते र्वा तदिष्यते ।
तत ऊर्ध्वं ब्रह्मचर्यं गार्हस्थ्यं वेच्छयेष्यते ॥६१

द्वाभ्यामेव प्रकाराभ्यां व्रतभङ्गः प्रजायते ।
स्मरणादेः स्त्रिया एको द्वितीयो नरयोरपि ॥६२

अप्राकृत्या च क्रियया च्युतः स्याद्ब्रह्मचर्यतः ।
महाव्रतं ब्रह्मचर्यं नैष्ठिकं यत्प्रकीर्तितम् ॥६३

तत्तु यावज्जीवमेव कर्तव्यं मुनिभिः स्मृतम् ।
वर्जये न्मधुमांसानि गन्धं माल्यं रसान्स्त्रियः ॥६४

शुक्तानि यानि सर्वाणि प्राणिनां चैव हिंसनम् ।
अभ्यङ्गमञ्जनं चाक्ष्णो रुपानच्छत्रधारणम् ॥६५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्यूतं च जनवादं च परिवादं तथानृतम् ।
कामं क्रोधं च लोभं च नर्तनं गीतवादनम् ॥६६

स्त्रीणां च प्रेक्षणालम्भमुपघातं परस्य च ।
एकः शयीत सर्वत्र न रेतः स्कन्दयेत्क्वचित् ॥६७

कामाद्धि स्कन्दयन् रेतो हिनस्ति व्रतमात्मनः ।
दशकाम समुत्थानि तथाष्टौ क्रोधजानि तु ॥६८

व्यसनानि दुरन्तानि प्रयत्नेन विवर्जयेत् ।
मृगयाऽक्षो दिवा स्वप्नः परिवादः स्त्रियो मदः ॥६९

तौर्यत्रिकं वृथाट्या च कामजो दशकोगणः ।
पैशुन्यं साहसं द्रोह ईर्ष्याऽसूयार्थदूषणम् ॥७०

वाग्दण्डजं च पारुष्यं क्रोधजोऽपि गणोऽष्टकः ।
द्वयोरप्येतयोर्मूलं यं सर्वे कवयो विदुः ॥७१

तं यत्नेन जयेल्लोभं तज्जावेतावुभौगणौ ।
पानमक्षास्त्रिय श्चैव मृगया च यथाक्रमम् ॥७२

एतत्कष्टतमं विद्याच्चतुष्कं कामजे गणे ।
दण्डस्य पातनं चैव वाक्पारुष्यार्थदूषणे ॥७३

क्रोधजेऽपि गणे विद्यात्कष्टमेतत्त्रिकं सदा ।
व्यसनस्य च मृत्योश्च व्यसनं कष्टमुच्यते ॥७४

व्यसन्यधोऽधो व्रजति स्वर्यात्यव्यसनी मृतः ।
सर्वेषामेव शौचानामर्थशौचं परं स्मृतम् ॥७५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योऽर्थे शुचि हि स शुचि र्न मृद्वारिशुचिः शुचि. ।
न मृल्लोष्ठं न मृद्नियात् न छिद्यात्करजैस्तृणम् ॥७६

न कर्म निष्फलं कुर्या न्नायत्यामसुखोदयम् ।
आरभेतैव कर्माणि श्रान्तः श्रान्तः पुनः पुनः ॥७७

कर्मण्यारभमाणं हि पुरुषं श्रीर्निषेवते ।
द्यूतमेतत्पुराकल्पे दृष्टं वैरकरं महत् ॥७८

तस्माद् द्यूतं न सेवेत हास्यार्थमपि बुद्धिमान् ।
द्यूतं समाह्वयं चैव राजा राष्ट्रान्निवारयेत् ॥७९

राज्यान्तकरणावेतौ द्वौ दोषौ पृथिवीक्षिताम् ।
प्रकाशमेतत्तास्कर्यं यद्देवनसमाह्वयौ ॥८०

तयो र्नित्यं प्रतीघाते नृपति र्यत्नवान् भवेत् ।

॥ इति पूर्वभागः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ उत्तरभागः

निषेवते प्रशस्तानि निन्दितानि न सेवते ।
अनास्तिकः श्रद्दधान एतत्पण्डितलक्षणम् ॥१

क्रोधोहर्षश्चदर्पश्च ह्रीस्तम्भो मान्यमानिता ।
यमर्थान्नापकर्षन्ति स वै पण्डित उच्यते ॥२

यस्य कृत्यं न विघ्नन्ति शीतमुष्णं भयं रति ।
समृद्धिरसमृद्धिर्वा स वै पण्डित उच्यते ॥३

निश्चित्य यः प्रक्रमते नान्तर्वसति कर्मणः ।
अवन्ध्यकालो वश्यात्मा स वै पण्डित उच्यते ॥४

न हृष्यत्यात्मसम्माने नावमानेन तप्यते ।
गाङ्गोह्रद इवाक्षोभ्यो यः स पण्डित उच्यते ॥५

प्रवृत्तवाक् चित्रकथ ऊहवान् प्रतिभानवान् ।
आशु ग्रन्थस्य वक्ता च नरः पण्डित उच्यते ॥६

यथाशक्ति चिकीर्षन्ति यथाशक्ति च कुर्वते ।
न किञ्चिदवमन्यन्ते नराः पण्डितबुद्धयः ॥७

मधुमांसं च ये नित्यं वर्जयन्तीह मानवाः ।
जन्मप्रभृति मद्यं च दुर्गाण्यतितरन्ति ते ॥८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MoE

आर्यकर्माणि रज्यन्ते भूतिकर्माणि कुर्वते ।
हितं च नाभ्यसूयन्ते पण्डिता भरतर्षभ ॥९

संभारयति कृत्यानि सर्वत्र विचिकित्सते ।
चिरं करोति क्षिप्रार्थे समूढो भरतर्षभ ॥१०

अश्रुतश्च समुन्नद्धो दरिद्रश्च महामनाः ।
अर्थाश्चाकर्मणा प्रेप्सु मूढ इत्युच्यते बुधैः ॥११

अमित्रं कुरुते मित्रं मित्रं द्वेष्टि हिनस्ति च ।
कर्मचारभते दुष्टं तमाहुर्मूढचेतसम् ॥१२

आत्मनो बलमज्ञाय धर्मार्थं परिवर्जितम् ।
अलभ्यमिच्छन्नैष्कर्म्यान्मूढबुद्धिरिहोच्यते ॥१३

अशिष्यं शास्ति यो राजन् यश्च शून्यमुपासते ।
कदर्यं भजते यश्च तमाहुर्मूढचेतसम् ॥१४

अर्थं महान्तमासाद्य विद्यामैश्वर्यमेवच ।
विचरत्यसमुन्नद्धो यः स पण्डित उच्यते ॥१५

एकमेवाद्वितीयं तद् यद्राजन्नाववुध्यसे ।
सत्यं स्वर्गस्य सोपानं पारावारस्य नौरिव ॥१६

एकः क्षमावतां दोषो द्वितीयो नोपपद्यते ।
यदेनं क्षमया युक्तमशक्तं मन्यते जनः ॥१७

सोऽस्य दोषो नमन्तव्यः क्षमाहि परमं बलम् ।
क्षमावलं ह्यशक्तानां शक्तानां भूषणं क्षमा ॥१८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एको धर्मः परं श्रेयः क्षमैका शान्तिरुत्तमा ।
विद्यैका परमा तृप्तिरहिंसैका सुखावहा ॥१६

त्रिविधं नरकस्येदं द्वारंनाशनमात्मनः ।
कामः क्रोध स्तथा लोभ स्तस्मादेतत्त्रयं त्यजेत् ॥२०

पञ्चत्वानुगमिष्यन्ति यत्र यत्र गमिष्यसि ।
मित्राण्यमित्रा मध्यस्था उपजीव्योपजीविनः ॥२१

षड्दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।
निद्रातन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता ॥२२

पडिमान्पुरुषो जह्याद्भिन्नां नावमिवार्णवे ।
अप्रवक्तारमाचार्यमनधीयानमृत्विजम् ॥२३

अरक्षितारं राजानं भार्यांचाप्रियवादिनीम् ।
ग्रामकामं च गोपालं वनकामं च नापितम् ॥२४

षडेवतु गुणाः पुंसा न हातव्याः कदाचन ।
सत्यं दानमनालस्यमनसूया क्षमा धृतिः ॥२५

अष्टौ गुणाः पुरुषं दीपयन्ति ।
प्रज्ञा च कौल्यं च दमः श्रुतं च ॥
पराक्रम श्चाबहुभाषिता च ।
दानं यथाशक्ति कृतज्ञता च ॥२६

न वैरमुद्दीपयति प्रशान्तम् ।
न दर्पमारोहतिनास्तमेति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MoE

न दुर्गतोऽस्मीति करोत्यकार्यम् ।
तमार्यशील परमाहुरार्याः ॥२७

दम्भं मोहं मत्सरं पापकृत्यं ।
राजद्विष्टं पैशुनं पूगवैरम् ॥
मत्तोन्मत्तैर्दुर्जनैरापि वादं ।
यः प्रज्ञावान् वर्जयेत्सप्रधानः ॥२८

मितं भुङ्क्ते संविभज्याश्रितेभ्यः ।
मितं स्वपित्यमितं कर्मकृत्वा ॥
ददात्यमित्रेष्वपि याचितः सं-
स्तमात्मवन्तं प्रजहत्यनर्थाः ॥२९

यः सर्वभूतप्रशमे निविष्टः ।
सत्योमृदुर्मानकृच्छुद्धभावः ॥
अतीव स ज्ञायते ज्ञातिमध्ये ।
महामणिर्जात्य इव प्रसन्नः ॥३०

य आत्माऽपत्रपते भृशं नरः ।
स सर्वलोकस्य गुरुर्भवत्युत ॥

यथा मधुसमादत्ते रक्षन् पुष्पाणि षट्पदः ।
तद्वदर्थान्मनुष्येभ्यआदद्याद विहिंसया ॥३१

किन्नुमेऽप्यादिदं कृत्वा किन्नुमेस्यादकुर्वतः ।
इति संचिन्त्य कर्माणि कुर्याद्वा पुरुषो न वा ॥३२

99639
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चक्षुषा मनसा वाचा कर्मणा च चतुर्विधम् ।
प्रसादयति लोकोऽयं तं लोकोऽनुप्रसीदति ॥३३

अप्युन्मत्तात्प्रलपतो बालाच्च परिजल्पतः ।
सर्वतः सारमादद्यादश्मभ्य इव काञ्चनम् ॥३४

जिता ;सभा वस्त्रवता मिष्टाशा गोमता जिता ।
अध्वाजितो यानवता सर्वं शीलवता जितम् ॥३५

ऐश्वर्यमदपापिष्ठमदापानमदादयः ।
ऐश्वर्यमदमत्तो हि नापतित्वा विबुध्यते ॥३६

धर्मार्थौ यः परित्यज्य स्वादिन्द्रियवशानुगः ।
श्रीप्राणधनदारेभ्यः क्षिप्रं स परिहीयते ॥३७

अर्थानामीश्वरो यः स्यादिन्द्रियाणामनीश्वरः ।
इन्द्रियाणामनैश्वर्यादैश्वर्याद्भ्रश्यते हि सः ॥३८

आत्मनात्मानमन्विच्छेन्मनोबुद्धीन्द्रियैर्यतैः ।
आत्माह्येवात्मनो बन्धु रात्मैव रिपुरात्मनः ॥३९

बन्धुरात्मात्मन स्तस्य येनैवात्माऽत्मनाजितः ।
स एव नियतो बन्धुः स एव नियतो रिपुः ॥४०

असंत्यागात्पापकृता मपापां तुल्योदण्डः स्पृशते मिश्रभावम् ।
शुष्केणार्द्रं दह्यतेमिश्रभावात् तस्मात् पापैः सह सन्धिं न कुर्यात् ॥४१

अनसूयार्जवं शौचं सन्तोषः प्रियवादिता ।
दानं सत्यमनायासो न भवन्ति दुरात्मनाम् ॥४२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बुद्धौ कलुषभूतायां विनाशे प्रत्युपस्थिते ।
अनयो नयसङ्काशोहृदयान्नापसर्पति ॥४३

नाक्रोशी स्यान्नावमानी परस्य ।
मित्रद्रोही नोत नीचोपसेवी ॥

न चाभिमानी न च हीनवृत्तो ।
रुक्षा वाचं रुषतीं वर्जयीत ॥४४

यदि सन्तं सेवति यदयसन्तं तपस्विनं यदि वा स्तेनमेव ।
वासो यथा रङ्गवशं प्रयाति तथा स तेषां वशमभ्युपैति ॥४५

यादृशैः सन्निविशते यादृशां श्रोपसेवते ।
यादृगिच्छेच्च भवितुं तादृग्भवति पूरुषः ॥४६

भावमिच्छति सर्वस्य नाभावे कुरुते मनः ।
सत्यवादी मृदुर्दान्तो यः स उत्तम पूरुषः ॥४७

तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता ।
सतामेतानि गेहेषु नोच्छिद्यन्ते कदाचनः ॥४८

नतन्मित्रं यस्य कोपाद्विभेति ।
यद्वामिश्रं शङ्कते नोपचर्यम् ॥

यस्मिन्मित्रे पितरीवाश्वसीत ।
तद्वै मित्रं सङ्गतानीतराणि ॥४९

अकस्मादेव कुप्यन्ति प्रसीदन्त्यनिमित्ततः ।
शीलमेतदसाधूनामभ्रं परिप्लवं यथा ॥५०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सन्तापाद्भ्रश्यते रूपं सन्तापाद्भ्रश्यते बलम् ।
सन्तापाद्भ्रश्यते ज्ञानं सन्तापाद् व्याधिमृच्छति ॥५१

अनवाप्यं च शोकेन शरीरं चोपतप्यते ।
अमित्राश्च प्रहृष्यन्ति मास्म शोके मनः कृथाः ॥५२

सुखं च दुःखं च भवाभवौ च ।
लाभालाभौ मरणं जीवितञ्च ॥

पर्यायशः सर्वमेते स्पृशन्ति ।
तस्माद्धीरो न च हृष्येन्न शोचेत् ॥५३

यस्मिन्यथा वर्तते यो मनुष्यः ।
तस्मिंस्तथा वर्तितव्यं सधर्मः ॥

मायाचारो मायया वर्तितव्यः ।
साध्वाचारः साधुना प्रत्युपेयः ॥५४

अकर्मशीलं च महाशनं च ।
लोकद्विष्टं बहुमायं नृशंसम् ॥

अदेशकालज्ञमनिष्टवेश ।
मेतान्गृहे न प्रतिवासयीत ॥५५

सन्नियच्छति यो वेग मुत्थितं क्रोधहर्षयोः ।
सश्रियो भाजनं राजन् यश्चापत्सु न मुह्यति ॥५६

निरर्थं कलहं प्राज्ञो वर्जयेन्मूढसेवितम् ।
कीर्तिं च लभते लोके न चानर्थेन युज्यते ॥५७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् ।
विश्वासाद् भयमुत्पन्नं मूलान्यपि निकृन्तति ॥५८

समृद्धा गुणतः केचिद् भवन्ति धनतोऽपरे ।
धनवृद्धान्गुणैर्हीनान् धृतराष्ट्र ! विवर्जय ॥५९

धारणाद् धर्ममित्याहु धर्मेण विधृताः प्रजाः ।
यः स्याद्धारणसंयुक्तः स धर्म इति निश्चयः ॥६०

प्रभवार्थाय भूतानां धर्मप्रवचनं कृतम् ।
यः स्यात्प्रभवसंयुक्त स धर्म इति निश्चयः ॥६१

अहिंसार्थाय भूतानां धर्मप्रवचनं कृतम् ।
यः स्यादहिंसासंयुक्त स धर्म इति निश्चयः ॥६२

श्रुतिधर्म इति ह्येके नेत्याहुरपरे जनाः ।
न च तत्प्रत्यसूयामो नहि सर्वं विधीयते ॥६३

कालो वा कारणं राज्ञो राजा वा कालकारणम् ।
अत्र ते संशयो माभूद्राजा कालस्य कारणम् ॥६४

राजा कृतयुगस्रष्टा त्रेतायाः द्वापरस्य च ।
युगस्य च चतुर्थस्य राजाभवति कारणम् ॥६५

कृतं त्रेतायुगं चैव द्वापरं कलिरेव च ।
राज्ञोवृत्तानि सर्वाणि राजा हि युगमुच्यते ॥६६

कलिः प्रसुप्तो भवति सजाग्रद्वापरं युगम् ।
कर्मस्वभ्युद्यतस्त्रेता विचरंस्तु कृतं युगम् ॥६७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रज्ञावृद्धं धर्मवृद्धं स्ववन्धुं—
विद्या वृद्धं वयसा चापि वृद्धम् ॥

कार्याकार्ये पूजयित्वा प्रसाद्य ।
यः संपृच्छेन्नसमुह्येत्कदाचित् ॥६८

धृत्या शिश्नोदरं रक्षेत् पाणिपादं च चक्षुषा ।
चक्षुः श्रोत्रं च मनसा मनोवाचं च कर्मणा ॥६९

न तत्परस्य सन्दध्यात्प्रतिकूलं यदात्मनः ।
संग्रहेणैव धर्मः स्यात्कामादन्यः प्रवर्तते ॥७०

विवर्जयीत मेधावी तस्मिन्मैत्री प्रणश्यति ।
अवलिप्तेषु मूर्खेषु रौद्रसाहसिकेषु च ॥७१

तथैवापेत धर्मेषु नमैत्रीमाचरे द्बुधः ।
कृतज्ञं धार्मिकं सत्यमक्षुद्रं दृढभक्तिकम् ॥७२

जितेन्द्रियं स्थितं स्थित्यां मित्रमत्यागि चेष्यते ।
इज्याध्ययनदानानि तपः सत्यं धृतिः क्षमा ॥७३

अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः ।
तत्रपूर्वश्चतुर्वर्गो दम्भार्थमपि सेव्यते ॥७४

उत्तरस्तु चतुर्वर्गो महात्मन्येव तिष्ठति ।
पूर्वे वयसि तत्कुर्याद् येन वृद्धः सुखं वसेत् ॥७५
यावज्जीवेन तत्कुर्याद् येनप्रेत्य सुखं वसेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गुणाश्च षड्मितभुक्तं भजन्ते ।
आरोग्यमायुश्च बलं सुखं च ॥

अनाविलं चास्य भवत्यपत्यम् ।
नचैनमाद्यून इति क्षिपन्ति ॥७६

सर्वाभयप्रदानं च सर्वानुग्रहणं तथा ।
सर्वोपकारकरणं शिवस्याराधनं विदुः ॥७७

अहमुच्चावचैर्द्रव्यैः क्रिययोत्पन्नयाऽनघे ।
नैवतुष्येऽर्चितोऽर्चायां भूतग्रामावमानिनः ॥७८

आतुराणां नृणां रक्षा रक्षकाणां च रक्षणम् ।
भीतस्याभयदानं च शिवभक्तिः प्रकीर्तिताः ॥७९

सर्वभूतेषु कारुण्यं प्रियभाषणमेव च ।
सर्वभूतहिते श्रद्धा साक्षाद्भक्तिः शिवस्यच ॥८०

अनादि मत्परं ब्रह्म नसत्तन्नासदुच्यते ।
सर्वतः पाणिपादंतत्सर्वतोऽक्षि शिरोमुखम् ॥८१

सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ॥८२

असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ।
वहिरन्तश्च भूतानामचरं चरमेवच ॥८३

सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत् ।
अविभक्तं च भूतेषु विभक्तमिव च स्थितम् ॥८४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ।
ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ॥८५

ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य धिष्ठितम् ।
अमानित्व मदम्भित्वमहिंसा क्षान्तिरार्जवम् ॥८६

आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ।
इन्द्रियार्थेषु वैराग्यमनहंकार एव च ॥८७

जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ।
असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ॥८८

नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ।
मयि चानन्यभावेन भक्तिरव्यभिचारिणी ॥८९

विविक्तदेशसेवित्वमरतिर्जनसंसदि ।
अध्यात्मज्ञाननित्यत्वं तत्वज्ञानार्थदर्शनम् ॥९०

योगी युञ्जीत सततमात्मानं रहसि स्थितः ।
एकाकी यतचित्तात्मा निराशी रपरिग्रहः ॥९१

शुचौ देशे प्रतिष्ठाप्य स्थिरमासन मात्मनः ।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् । ९२

तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः ।
उपविश्यासने युञ्ज्या द्योगमात्मविशुद्धये ॥९३

समं कायशिरोग्रीवं धारय न्नचलं स्थिरः ।
सम्प्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥९४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रशान्तात्मा विगतभी ब्रह्मचारी व्रते स्थितः ।
मनः संयम्य मच्चित्तो युक्त आसीत मत्परः ॥९५

युञ्जन्नेवं सदात्मानं योगी नियतमानसः ।
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति ॥९६

नात्यश्नतस्तु योगोऽस्ति नचैकान्तमनश्नतः ।
न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥९७

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥९८

यदा विनियतं चित्त मात्मन्येवावतिष्ठते ।
निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥९९

बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च ।
शब्दादीन् विषयां स्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥१००

विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥१०१

अहंकारं बलं दर्पं कामं क्रोधं परिग्रहम् ।
विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते ॥१०२

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति ।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥१०३

भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतमि ।
ततो मां तत्वतो ज्ञात्वा विशते तदनन्तरम् ॥१०४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MDF

देव-द्विज-गुरु-प्राज्ञपूजनं शौचमार्जनम् ।
ब्रह्मचर्यमहिंसा च शरीरं तप उच्यते ॥१०

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥१०

मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ।
भावसंशुद्धिरित्येतत् तपो मानसमुच्यते ॥१०

उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥१०

शनकैस्तु क्रियालोपादिमाः क्षत्रियजातयः ।
वृषलत्वं गता लोके ब्राह्मणानामदर्शनात् ॥१०

पौण्ड्रकाश्चौड्रद्रविडाः काम्बोजा यवनाः शकाः ।
पारदा पह्लवाश्चीनाः किराता दरदाः खशाः ॥११

सर्वेषां ब्राह्मणो विद्यादवृत्युपाया न्यथाविधि ।
प्रब्रूयादितरेभ्यश्च स्वयं चैव तथा भवेत् ॥११

किरात-हूणान्ध्र-पुलिन्द-पुल्कसा आभीरकङ्का-यवना-खशादयः
येऽन्येऽपि पापा यदुपाश्रयाश्रयाः शुद्ध्यन्ति तस्मै प्रभविष्णवे नमः

न विशेषोऽस्ति वर्णानां सर्वं ब्राह्ममिदं जगत् ।
ब्रह्मणा सृष्टपूर्वं तु कर्मभि र्वर्णतां गतम् ॥११३

सत्यं दानमथाद्रोह आनृशंस्यं त्रपा घृणा ।
तपश्च दृश्यते यत्र स ब्राह्मण इति स्मृतः ॥११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDP

-र्वभक्षरतिर्नित्यं सर्वकर्मकरोऽशुचिः ।
१० यक्तवेदस्त्वनाचारः स वै शूद्र इति स्मृतः ॥११५

इत्येतैः कर्मभि र्व्यस्ता द्विजा वर्णान्तरं गताः ।
१० धर्मो यज्ञक्रिया तेषां नित्यं न प्रतिषिध्यते ॥११६

शूद्रे चैतद्भवेल्लक्ष्यं द्विजे तच्च न विद्यते ।
१० न वै शूद्रो भवेच्छूद्रो ब्राह्मणो न च ब्राह्मणः ॥११७

वेदः

१० उच्च तद्दिव्य मचिन्त्यरूपं सूक्ष्माच्च तत्सूक्ष्मतरं विभाति ।
दूरात्सुदूरे तदिहान्तिके च पश्यत्स्विहैव निहितं गुहायाम् ॥११८

भ्यस्तपसा ह्येष आत्मा सम्यग्ज्ञानेन ब्रह्मचर्येणनित्यम् ।
११ रे ज्योतिर्मयो हि शुभ्रोऽयं पश्यन्ति यतयः क्षीणदोषाः ॥११९

दीप्तात्पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः ।
१२ विविधाः सौम्यभावाः प्रजायन्ते तत्र चैवापि यान्ति ॥१२०

दयः जयते नानृतं सत्येन पन्था विततो देवयानः ।
नम ऋषयो ह्याप्तकामा यत्र तत्सत्यस्य परमं निधानम् ॥१२१

द्याञ्चाविद्याञ्च यस्तद्वेदोभयं सह ।
१३ विद्यया मृत्युन्तीर्त्वा विद्ययाऽमृतमश्नुते ॥१२२

मै मा दिव्य कृपिमित्कृपस्व ।
१४ च्छध्वं संवदध्वं संवो मनांसि जानताम् ॥१२३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समानो मन्त्रः समिति.

समानं मन्त्रमभिमन्त्रयेम

समानी व आकूतिः समाना

समानमस्तु वो मनः यथा वः सुसहामति ॥१२५

सहनाववतु सह नौ भुनक्तु सह वीर्यं करवावहै ।
तेजस्विनावधीतमस्तु मा विद्विषावहै ॥१२६

यथेमां वाचं कल्याणी मावदानि जनेभ्यः ।
ब्रह्मराजन्याभ्यां शूद्राय चार्याय चस्वाय चारणाय च ॥१२७

यत्प्रज्ञानमुतचेतो धृतिश्च यज्ज्योति रन्तरमृतम्प्रजासु ।
यस्मान्नऽऋते किञ्चन कर्मक्रियते तन्मे मनः शिवसङ्कल्पमस्तु ॥१२८

(:) इति (:)

DUE

प्राप्तिस्थानः— 99629

श्री पिण्डेश्वर संस्कृत महाविद्यालय, धरान
पो०:—जोगबनी
जि०:—पूर्णियाँ

Q2
POK
2019

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

९९६३१

AUTHOR पोखरेल हरिलाल

TITLE मुक्तायनम्

९९६३१

Q2
POK
2019

महेन्द्र संस्कृत विश्वविद्यालय
वाल्मीकि विद्यापीठ
पुस्तकालय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वाधिकारः सुरक्षितः

मुद्रक :
श्री शिव प्रिंटिङ्ग प्रेस
धरान

धर्मशास्त्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu